# दिवाकरद्युतिः



वेदमार्तण्डाचार्यदिवाकरमहापात्राभिनन्दनग्रन्थः

दिवाकरद्युतिः

(वेदमार्तण्ड-आचार्यदिवाकरमहापात्राभिनन्दनग्रन्थः)

प्रकाशिका –
अर्वाचीनसंस्कृतसाहित्यपरिषद्
सी ६२, अक्षरधाम टेनामेन्ट्स,
मथुरानगरी समीप, अक्षरचोक,
वडोदरा, गुजरात. 390020
२०१६

ISBN :978-93-827 13-15-9

प्रतिलिपयः - ३००
प्रकाशनवर्षम् – २०१६
मूल्यम् – ५००
प्राप्तिस्थानम् – वेदनिकेतनम्, लुहागडजागा, शंकरानन्दमथलेन्
तिआडिसाहि, पुरी- ७५२००१ , ओडिशा
दूरभाषा- ०९४३७६९७५३०

मुद्रणम् – Pagemaker Computer Services
117, Bapuji Nagar, Bhubaneswar - 751009

# वेदान्तदर्शनस्य अनुबन्ध चतुष्टयम्

डॉ.महेन्द्रकुमार अं.दवे

ब्रह्मात्मप्रतिपत्तिपरेषु श्रुतिसूत्रेषु विद्वन्निर्मितनिबन्धेषु चाविशेषेण वेदान्तशाब्दस्य लोके प्रयोगदर्शनात्सर्वत्र मुख्यवृत्तितः प्रतीतिं वारयन्मुख्यगौणभेदेन वेदान्तशब्दं व्युत्पादयति- वेदान्तोनाम इत्यादिना । स्वार्थप्रतिपत्तारमनोश्रित्य शास्त्रस्यप्रवृत्य योगादादावधिकार्यनुबन्धापेक्षा । तस्य च विषयबोधमन्तरेणाप्रवृत्तेर्विषयस्य तदानन्तर्यम् । विषयस्य च शक्यप्रतिपाद्यत्वसिद्धये सम्बधस्य विषयानन्तर्यम् । प्रयोजनस्य चरमत्वं प्रसिद्धमित्युपदेशविवक्षितः । विषयः प्रयोजनं संबन्धोऽधिकारी चेत् अनुबन्धचतुष्टयम् । अस्य वेदान्तशास्त्रस्य ब्रह्मैव विषयः । मोक्ष्य एव प्रयोजनम् । प्रतिपाद्य-प्रतिपादकभावो बोध्य-बोधकभावो वा संबंधः । साधन- चतुष्टयसंपन्नोऽधिकारी । यथा बृहस्पतिसवने ब्राह्मण एव, राजसूये क्षत्रिय एव, तथा वेदान्तशास्त्रे साधनचतुष्टयसंपन्न एवाधिकारी । नित्यानित्यवस्तुविवेक ईहामुत्रार्थ फलभोगविरागः शमादिषटकं मुमुक्षुत्वं चेति साधनचतुष्टयम्।

'ब्रह्मैव नित्यम्, जगदनित्यम्' इति श्रुतिस्मृतिपुराणादिना स्वयमेव जायमानं ज्ञानं नित्यानित्य वस्तुविवेकः । 'इह स्रक्चन्दनादि विषयभोगोऽमुत्राप्सरः स्त्रीविषयादिभोगश्चेत्युभयमपि अनित्यम्' इति श्ववान्ताशन मूत्रपुरीषागिवत्तत्र वैरस्यमिहामुत्रार्थफलभोगविरागः । शमदमोपरतितितिक्षासमाधानश्रद्धा इति शमादिषटकम् । शमो नाम श्रवणादि व्यतिरेकेभ्यो निवर्त्यात्मन्येव श्रवणदि विषये मनसः स्थापनम् । दमो नाम ज्ञानकर्मेंद्रियनिग्रहः । उपरति नाम सन्यासो निष्कामकर्मानुष्ठानं व्यवहारपोलो वा । तितिक्षा नाम प्रारब्धा गत शीतोष्णादिसहनम् । समाधानं नाम श्रवणाद्यनुकूलविषये मनसः समाधिः । श्रद्धा नाम गुरुवेदान्तवाक्यविश्वासः इति शमादि चतुष्टयम् । गृहे दह्यमाने तत्रस्थो दह्यमानः पुरुषो यथा कलत्र पुत्रादिकं परित्यज्य श्वतामोपसमनार्थमेव बहिर्निगत्य तापोपशमनं कर्तुमिच्छति, एव सांसारिकतापोपशमनं संपादयितुं त्यक्तसर्वेक्षणस्य ब्रह्मतादात्म्य भावे मोक्षे तीव्रईच्छा मुमुक्षा। आत्यन्तिकं सुखं केवलं मोक्षः तथात्यन्तिकदुःखनिवृत्तिरात्यन्तिकं सुखं चेति मिलितं मोक्ष इति पक्षद्वयमुक्तरीत्या संभवदुक्तिकमपि श्रुतेरनभिमतमिति गम्यते ।

[1] इतीयं मोक्षावस्थां प्रदर्शयन्ती श्रुतिर्दुःखजनकमप्रियस्पर्शमिव सुखजनकं प्रियस्पर्शमपि प्रतिषेधति।

लोके केषाञ्चित् नित्यानित्यवस्तुविवेके सत्यपि वैराग्यस्यादर्शनादिहामुत्रार्थफलभोगविरागेणापि भवितव्यम् इति उक्तम्। तदुभयसत्त्वेऽपि केषाञ्चिदृषीश्वराणां कोपतापादि दर्शनात् शमादिनामपि भवितव्यम् इति उक्तम्। एतत् त्रितये सत्यपि केषाञ्चित् भक्तेश्वरोपासकानां ज्ञानाधिकारा दर्शनान् मुमुक्षयापि भवितव्यम्। मोक्षावस्थायां ज्ञानसत्त्वेन तु ज्ञानगुणस्यैव सर्वथोच्छेदे सति न लेशतोपि सुखंदुःखं वा। यद्यप्येवंरीत्या मोक्षावस्थायामात्यन्तिकी दुःखनिवृत्तिः केवलोपपद्यते तथापि नासौ मोक्षावस्था श्रुतेः संमता भवति। सर्वात्मैक्यदृष्टेरभावात्। जडानां हि दृष्टिरेव नास्ति कुतः सर्वात्मैक्यदृष्टिः। श्रुतिश्चयत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्।[2]

एवं रूपोऽधिकार्युपहारसमित्पाणिः सन्सद् गुरुमुपगम्य नमस्कृत्य विश्वासविनयाभ्यां सह " हे स्वामिन्! हे भगवन्! गुरो! इति संबोध्य, जीवः कः? ईश्वरः कः? जगत् कीदृशम्? एतद् त्रितयं कस्मादागतम्? कस्माद् गमिष्यति? इति पश्नं कुयात्। "परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। तद् विज्ञानार्थं स गुरुमेव अभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् इति।[3] गीतायामपि ज्ञानिनः तत्त्वदर्शिता विषये कथयति।[4] परमात्मा हि सर्वकारणकारणभूतः सर्वान्तर्यामी सर्वेभ्यः पर इति तत्साक्षात्कारः स्थूलदृश्नामत्यन्ताशक्य एव। सूक्ष्मतरदृशां कुशाग्रबुद्धीनां प्रतिभाशालिनामपि श्रुतिप्रदर्शितमार्गमन्तरेण परमात्मसाक्षात्कारोऽशक्य एव। श्रुतिरपि परमकृपयाविष्टा बद्धाञ्जीवानुद्धर्तुकामा परमात्मप्रज्ञात्मने कथं कथमपि प्रवृत्ता। यतः श्रुतिः परमात्मप्रज्ञापने स्वस्या असामर्थ्यं यतो वाचो निवर्तन्ते इति स्वयमेवाह।[5] परंच धर्मार्थकाममोक्षाणां चतुर्णां पुरुषार्थानां मध्ये मोक्ष एव परमपुरुषार्थः नित्यत्वात्,' न च पुनरावर्तते न च पुनरावर्तते' इति श्रुतेः।[6] इतरेषां त्रयाणां न तथात्वम्, अनित्यत्वात् 'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र

---

[1] अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः। --छांदोग्य उपनिषत् -८/१२/१/

[2] बृहदारण्यकोपनिषद्-२/२/४.


[3] मुण्डकोपनिषद् - १-२-१२.

[4] तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥ -श्रीमद् भगवद्गीता-४-३४.

[5] तैत्तिरीयोपनिषद् – २/९/१.

[6] छांदोग्योपनिषद्- ८-१५-१.

पुण्यचितो लोकः क्षीयते '।'[7] स च मोक्षो ब्रह्मज्ञानादेव सिध्यति, 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ।[8] ब्रह्मविदाप्नोति परम् इत्यादिश्रुतिभ्यः[9] तच्च ब्रह्म अध्यारोपापवादाभ्यां ज्ञातव्यम्, आरोपितनिर्वृत्यैवाधिष्ठानज्ञानोदयात्, अध्यारोपापवादाभ्यां ज्ञातव्यः तत्त्वनिर्णयः, न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुः ।[10] इति वचनात्, तस्मान्मुमुक्षुणा अध्यारोपापवादावश्यकं ज्ञातव्यौ ।




एवं साधनचतष्टयसम्पन्नस्याधिकारिणो विज्ञातविषयामत आत्मयाथात्म्यजिज्ञासायां गुरुपसत्तिं दर्शयति –अयम् अधिकारीति । जननमरणादीत्यादिपदाद्रागद्वेशादिग्रहः । संसारानलसन्तप्तो गुरुमुपसृत्य तमनुसरतीत्यन्वयः । उपसरणं समीपगमनम् अनुसरम् अनुवृत्तिः इति भेदः । धर्मजिज्ञासाधिकारिणोऽस्य वैलक्षण्यसूचनार्थस्तुशब्दः । प्रमाताधिकारीत्यन्वयः । लौकिकवैदिकव्यवहारेष्वभ्रान्तोजीवः प्रमातेह विवक्षितः । जीवमात्रस्य पक्षे भ्रमसम्भवेन शास्त्रार्थप्रतिपत्तृत्वायोगात् । तस्य तु शब्दसूचितं विशेषमाह साधनचतुष्टयम् इति ।

विषयानुबन्धे कथयामि यत् क्षीरनीरवत्परस्परविभिन्नयोः समानाभिहारस्यैक्यसैक्य शब्दार्थत्वाज्जीवब्रह्मणोरपि स्वरूपतो भिन्नयोरेक्यं मिश्रीभाव इति शङ्का स्यात्सा माभूदिति व्याचष्टे ।-शुद्धचैतन्यमिति । चैतन्यस्य शुद्धत्वम् सर्वधर्मातीतत्वं एकरसत्वम् । ननु कथं शुद्धचैतन्यस्य विचारविषयत्वं यावता प्रागपि विचारातत्स्वप्रकाशं स्वयमेवावभासत इत्याशङ्क्य स्वरूपेणावभासमानत्वेऽपि परिपूर्ण सच्चिदानन्दप्रत्ययस्वरूप तया ज्ञायमानत्वाद्विषयत्वोपपत्तिरित्यभिप्रेत्याह प्रमेयमिति ।

---

[7] छांदोग्योपनिषद् -८-१-६.

[8] श्वेताश्वतरोपनिषद्- ६-५.

[9] तैत्तिरीयोपनिषद् – २.१.

[10] कैवल्योपनिषद् -०३

सम्बन्धविषये कथयति यद् तदैक्यं प्रत्यग्ब्रह्मणोरैक्यं तच्च तत्प्रमेयं चेति तथा तस्येति विग्रहः । ननु कथं तथोक्तप्रमेयस्य उपनिषत्प्रमाणबोधत्वं निर्धर्मके तस्मिन्छब्दशक्ति-गोचरत्वायोगादिति चेत्को भावः ।

अज्ञानम् वक्षमाणलक्षणम् । तस्य निवृत्तिः प्रयोजनमिति एतावत्युक्ते समूलदुःखोन्मूलनलक्षणं वैशेषिकाभिमतं प्रयोजनम् अभ्युपगतं प्रतिभायात् । तन्माभूदिति विशेषणान्तरोपादानम् । अज्ञाननिवृत्तिः आनन्दावाप्तिश्च प्रयोजनमित्युक्ते नित्यनिरतिशय-सुखाभिव्यक्तिर्निःशेषदुःखोच्छित्तिश्च प्रयोजनमिति भाट्टाभिमतं प्रयोजनं प्रतिभायात् ।

एवं शिष्येण प्रार्थितः सद्गुरुर्दयया सत्त्वरजस्तमोगुणैः जीवेश्वरजगतामागमनप्रकारं बोधयित्वा आत्मस्वरूपमपि करतलामलकवद्बोधयति । अस्याधिकारिणः साधनचतुष्टयं च बहुजन्मार्जितपुण्यपुञ्ज- परिपाकवशादीश्वरानुग्रहेण लब्धमिति वेदितव्यम् । एतत् तत्त्वज्ञान-प्रदायकं गुरुमीश्वरमेव विद्यात् । एवं यो गुरुमुखाज्जीवात्मपरमात्मनोरभेदं विचार्य जानाति स एव मुक्तिं गमिष्यति सिद्धम् ।

एसोसियेट प्रोफेसर,
साहित्यविभाग ,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्